अथ मूर्तिरहस्यम्
ऋषिरुवाच
ॐ नन्दा भगवती नाम या भविष्यति नन्दजा ।
स्तुता सा पूजिता भक्त्या वशीकुर्याज्जगत्त्रयम् ॥ १॥
कनकोत्तमकान्तिः सा सुकान्तिकनकाम्बरा ।
देवी कनकवर्णाभा कनकोत्तमभूषणा ॥ २॥
कमलाङ्कुशपाशाब्जैरलंकृत चतुर्भुजा।
इन्दिरा कमला लक्ष्मीः सा श्री रुक्माम्बुजासना॥ ३॥
या रक्तदन्तिका नाम देवी प्रोक्ता मयानघ।
तस्याः स्वरुपं वक्ष्यामि श्रृणु सर्वभयापहम् ॥ ४॥
रक्ताम्बरा रक्तवर्णा रक्तसर्वाङ्गभूषणा।
रक्तायुधा रक्तनेत्रा रक्त्केशातिभीषणा॥ ५॥
रक्ततीक्ष्णनखा रक्तदशना रक्तदन्तिका ।
पतिं नारीवानुरक्ता देवी भक्तं भजेज्जनम् ॥ ६॥
वसुधेव विशाला सा सुमेरुयुगलस्तनी ।
दिर्घौ लम्बावतिस्थूलौतावतीव मनोहरै॥ ७॥
कर्कशावतिकान्तौ तौ सर्वनन्दपयोनिधी।
भक्तान् सम्पाययेद्देवी सर्वकामधौ स्तनौ॥ ८॥
खड्गं पात्रं च मुसलं लाङ्गलंच बिभर्ति सा।
आख्याता रक्तचामुण्डा देवी योगेश्वरीतिच॥ ९॥
अनया व्याप्तमखिलं जगत्स्थावरजङ्गमम्।
इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरम्॥ १०॥
(भुक्त्वा भोगान् यथाकामं देवीसायुज्यमाप्नुयात्।)
अधीते य इमं नित्यं रक्तदन्त्या वपुःस्तवम्।
तं सा परिचरेद्देवी पतिं प्रियमिवाङ्गना॥ ११॥
शाकम्भरी नीलवर्णा नीलोत्पलविलोचना।
गम्भीरनाभिस्त्रिवलीविभूषिततनूदरी॥ १२॥
सुकर्कशसमोत्तुङ्गवृत्तपीनघनस्तनी।
मुष्टिं शिलीमुखापूर्णं कमलं कमलालया॥ १३॥
पुष्पल्लवमूलादिफलाढ्यं शाकसञ्चयम् ।
काम्यानन्तरसैर्युक्तं क्षुत्तृणमृत्युभयापहम्॥ १४॥
कार्मुकं च स्फुरत्कान्ति बिभ्रती परमेश्वरी।
शाकम्भरी शताक्षी सा सैव दुर्गा प्रकीर्तिता॥ १५॥
विशोका दुष्टदमनी शमनी दुरितापदाम्।
उमा गौरी सती चण्डी कालिका सा च पार्वती॥ १६॥
शाकम्भरीं स्तुवन् ध्यायज्जपन् सम्पूजयन्नमन्।
अक्षय्यमश्नुते शीघ्रमन्नपानामृतं फलम् ॥ १७॥
भीमापि नीलवर्णा सा दंष्ट्रादशनभासुरा।
विशाललोचनानारी वृत्तपीनपयोधरा॥ १८॥
चन्द्रहासं च डमरुं शिरः पात्रं च बिभ्रती।
एकवीरा कालरात्रिः सैवोक्ता कामदा स्तुता॥ १९॥
तेजोमण्डलदुर्धर्षा भ्रामरी चित्रकान्तिभृत्।
चित्रानुलेपनादेवी चित्राभरणभूषिता॥ २०॥
चित्रभ्रमरपाणिःसा महामारीतिगीयते।
इत्येता मूर्तयो देव्या याः ख्याता वसुधाधिप॥ २१॥
जगन्मातुश्चण्डिकायाः कीर्तिताः कामधेनवः।
इदं रहस्यं परमं न वाच्यं कस्यचित्त्वया॥ २२॥
व्याख्यानं दिव्यमूर्तीनामभीष्टफलदायकम् ।
तस्मात् सर वप्रयत्नेन देवीं जप निरन्तरम्॥ २३॥
सप्तजन्मार्जितैर्घोरैर्ब्रह्महत्यासमैरपि।
पाठमात्रेण मन्त्राणां मुच्यते सर्वकिल्बिषैः॥ २४॥
देव्या ध्यानं मया ख्यातं गुह्याद् गुह्यतरं महत्।
तस्मात् सर्वप्रयत्नेन सर्वकामफलप्रदम् ॥ २५॥
(एतस्यास्त्वंप्रसादेन सर्वमान्यो भविष्यसि।
सर्वरुपमयी देवी सर्वं देवीमयं जगत्।
अतोऽहं विश्वरुपां तां नमामि परमेश्वरीम्।)

इति मूर्तिरहस्यं सम्पूर्णम्